National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 334-336
© 2026 NJHSR
www.sanskritarticle.com

**डॉं.मिथुनकुमारशतपथी**
अतिथिअध्यापकः
(सहायकाचार्यः), साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

**Correspondence:**
**डॉं.मिथुनकुमारशतपथी**
अतिथिअध्यापकः
(सहायकाचार्यः), साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा

# श्रीमद्भागवते नवधाभक्तिः

**डॉं. मिथुनकुमारशतपथी**

**उपक्रमः**

धर्मो भवति भारतस्य प्राणभूतः। पुरातनकालात् या धर्मभावना धार्मिकचिन्तनस्य च सृष्टिर्भूत् अद्यावधि सा धारा प्रवाहिता अस्ति। भक्तेः उद्भवः कदा, कुत्र, किमर्थं च इति विषये निश्चयात्मकरूपेण वक्तुं न शक्यते। परन्तु वैदिकसाहित्यं यथा कर्मणः ज्ञानस्य च उद्गमस्थलं भवति, तद्वत् भक्तेरपि मूलस्रोतः भवति।

**भक्तिः परिभाषा**

उपायपूर्वकं भगवति मनः स्थिरीकरणं भक्तिः। अर्थात् स्वचित्तस्य भगवतः उपरि स्थिरता भवति। यदा जीवस्य स्वमतः, वाणी, शरीरश्च भगवन्मयो भवति तथा मनसा स्मरणं, वाण्यां गुणगानं, शरीरेण निरन्तरं तस्य एव सेवाञ्च करोति, तद्भक्तिः भजनम्।

एवं केवलं भगवतः कृतीनां चिन्तनं तथा मनः वृत्तीनां केन्द्रः स एव भगवान् भवति तदा सा अवस्था भवति भक्तिः। एषा परम्परा वैदिककालात् प्रचलति। सामान्यतया शास्त्राणां मतानुसारेण प्रेपूर्वकं कृतं भगवतः ध्यानं भवति भक्तिः। स्वयं श्रीकृष्णेन गीतायामुक्तम् –

**तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।**
**ददामि बुद्धियोगं तं येन मामुपयान्ति ते।।**
**प्रियो हि ज्ञानीनाऽत्यर्थमहं स च मम प्रियः।**
**भक्त्या त्वनन्यया शक्यः, भक्त्या लभ्यस्त्वनन्यया।।**

देवर्षिनारदः उक्तवान् यत् "परमात्मनि परमप्रेम भवति भक्तिः" इति। महर्षिशाण्डिल्यः स्वरचित भक्तिसूत्रे "परमानुरागः भक्तिरिति" कथयति। सा तस्मिन् परमप्रेमरूपा। सा परानुरक्तिरीश्वरे।
पुनश्च श्रीमद्भागवते उक्तमस्ति स न केवलं गोपीपुत्रः परन्तु सर्वप्राणीनाम् अन्तःकरणे विराजमानोऽस्ति। धर्मरक्षको नारदः नादरभक्तिसूत्रे उक्तवान् यत् - "परमानुरागो नाम भक्तिः" एष अनुरागो गोपीकानां हृदये परिलक्ष्यते। व्यासस्य मते "भागवत्पूजानुष्ठाननादीकरणे अनुरागो भवति भक्तिः"।

**भागवते नवधा भक्तिः**

श्रीमद्भागवते नवधाभक्तिविषये वर्णनं सुविस्तृतं वर्तते। तत्र स्वपितरं प्रति प्रह्लादः बोधयति भक्तेः महात्म्यम्। तदुक्तं भागवते यथा –

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।**
**इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणम्।**
**क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्।।**

1. **श्रवणम् –** भगवतः नामादिशब्दानां परोक्तानां वा श्रोत्रेण ग्रहणं श्रवणमित्युच्यते।

2. **कीर्तनम् –** भगवतः नामोच्चारणं कीर्तनं भवति।

3. **स्मरणम् –** भगवन्नामरूपादीनां मनसी चिन्तनं भवति स्मरणम्।

**4.पादसेवनम् –** परिचर्या प्रतिपादौ साधारणं पादसेवनम्।

**5.अर्चनम् –** सुगन्धीतजलीदिषुपूजा अर्चनम्।

**6.वन्दनम् –** दण्डवत्प्रणामादि सर्वाङ्गैरभिवादनं वन्दनमुच्यते।

**7.दास्यम् –** कर्मार्पणं दास्यं कथ्यते।

**8.सख्यम् –** तद्विश्वासादि सख्यमित्याहुः।

**9.आत्मानिवेदनम् –** देहसमर्पणमात्मनिवेदनम्।

एता: भवन्ति नवधा भक्तिः।

**1. श्रवणम् –**

"श्रवणं नाम चरितगुणादीनां श्रुतिर्भवेत्" इति। अर्थात् नामचरितगुणादीनां श्रुतिः श्रवणं भवेत्। भगवतः गुणानुवादनं नामानि वा कर्णाभ्यां स्वीकृत्य मनसि निवेसनं श्रवणमित्युच्यते। यस्य नाम सङ्ग्रहेण आध्यात्मिकादिभौतिकादिदैविकाणां त्रितापानां विनाशसम्भवति। पूर्वजन्मकृताः संस्काराः पापानि च विनश्यन्ति। पुनरपिगुणानुवादश्रवणसमये नियोजनेन चञ्चलात्मकः मनः लौकिकपरलौकिकान् विषयान् प्रति न रमते।

परिक्षितः शौनकः जन्मेजयादयः भवन्ति श्रवणसक्ता भक्ताः। एतेषु परिक्षितस्य स्थानं सर्वोत्तमम्। यदा शापवशात् तं तक्षकः सर्पः घातयिष्यतीति सः ज्ञातः, स व्यासनन्दनं शुकदेवमाहूय हरिकथामृतं भागवत् श्रुतवान्। एवं सप्तदिनेषु सः भगवतः हरेः परमां प्रीतिं प्राप्तवान्।

**2. कीर्तनम्**

लिङ्गपुराणे कथ्यते यत् - "नामलीलागुणादीनामुच्चैर्भाषा तु कीर्तनम्" इति। अर्थात् नामलीलागुणादीनाम् उच्चैर्भाषणं तु कीर्तनम् इति। यः मानवः जिह्वालब्ध्वापि विष्णोः कीर्तनं न कीर्तयति स मानवः मोक्षं न प्राप्नोति। नारदः, हनुमान्, प्रह्लादः ध्रुवः एते भवन्ति कीर्तनयुक्ताः भक्ताः। एतेषु नारदोऽन्यतमः। नारदः तस्य जन्मात्परमेव तस्य वीणायाः साहाय्येन भगवतः गुणान् नामानि च कीर्तनं कुर्वन्नस्ति। यथा श्रीमद्भागवते उच्यते।

**अहो देवर्षिर्धन्योऽयं यत्कीर्तिं शाङ्गर्धन्वतः।**
**गायन्ताद्यन्तिदं तन्त्र्या रामयत्यातुरं जगत्।।**
**पुनश्च – कलिं सभाजयन्त्यार्यां गुणज्ञा सारभागिनः।**
**कीर्तनेनैव कृष्णस्य मुक्तसङ्गः परं व्रजेत्।।**

एवम् अकीर्तने निन्दामुक्त्वा विशेषात् कलियुगे कीर्तनं प्रशस्तमित्याहु – कलिमिति। कलिं कलियुगं सभाजयन्ति प्रशंसन्ति कलर्गुणं जानन्ति, यत् सारभागं सारांशं गृह्णन्तीति सारभागिनः। यत्र युगे कीर्तनेनैव कृष्णस्य अत एव सभाजयन्तीत्यर्थः।

**3. स्मरणम्**

"ध्यानरूपगुणाक्रीडासेवैदैः सुष्ठ चिन्तनम्" इति। अर्थात् रूप-गुण-क्रीडा-सेवादेः सुष्ठुः चिन्तनं ध्यानम्। स्मरणं ध्यानम् एकार्थबोधकम्, भगवतः गुणानां कर्णाभ्यां श्रुत्वा मनसी स्थापनं स्मरणमिति उच्यते। एतस्य स्मरणेन मनः कदापि लौकिकविषयं प्रति न गच्छति। मनः सदैव भगवतः चरणकमले लीना भवति। मनः प्रफुल्लितो भवति, वाणी सत्येव भाष्यते। अन्येषामपकारस्य विषये मनुष्यः कदापि न चिन्तयति।

स्मरणासक्तभक्तेषु प्रह्लादः भवति सर्वोत्तमः। प्रह्लादं स्वपिता हिरण्यकश्यपः हन्तुं बहुः प्रयासं कृतवान् परन्तु सः प्रह्लादः स्वमनः भगवति विष्णोः समर्पणं कृतवान् इति हेतोः तस्य किमपि नाभवत्। कदा तं प्रह्लादं नित्वा अग्नौ स्थापितः पुनः कदा नित्वा सर्पाणां पार्श्वे स्थापितः, पुनरपि कदा खड्गेन हन्तुं प्रयासरतः आसीत्। परन्तु भगवतः यः उदारः भक्तः भवति तस्य कदापि कोऽपि पीडां दातुं न समर्थो भवति। एवं रूपेण यदा तस्य पिता प्रह्लादं प्रति पीडां दत्तमासीत् तदा भगवान् विष्णुः नरसिंहरुपेण खम्बात् आविर्भूतः एवं राक्षसं हिरण्यकशिपुं संहारं कृतः।

**4. पादसेवनम् –**

कीटादारभ्यः ब्रह्मादिस्तम्भपर्यन्तं सर्वेऽपि भगवतः पादसेवनमितं भक्तः भवितुं कामयन्ते। भगवतः पादसेवनेन पदानन्दं जीवस्य कृते लभते तथा लौकिकपरलौकिकेषु विषयेषु कदापि न लभ्यते। ईश्वरस्य पादसेवनेन परमानन्दस्य ब्रह्मानन्दस्य च प्राप्तिः भवति। स जीवः ईश्वरस्य पादसेवनेन भक्त्या अमृतरूपी संसारे परमहंसः भूत्वा विचरति।

**5. अर्चनम् -**

लौकिकविषयान् स्वीकृत्य यथा नारिकेलं, पुष्पं, फलं, धूपं, दीपादिकं दत्वा भगवतः पूजाकरणं भवति साधारणतया अर्चनम्। एषा केवलं पूजा नास्ति, पुनरपि अत्र उदाह्रियते यत् कुबेरस्य पुत्रौ नलकूबरमणीग्रीवौ भगवतः पूजाविषये उक्तमासीत् यथा -

**वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः।**

**स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम्।।**

तौ उक्तवन्तौ यत् आवयोः वाणीः भवतः गुणानुवर्णने रतः भवतु, श्रवणौ भवतः रमणीयकथायां नियोजयताम्, हस्तौ कर्मणां भवन्तं सेव्यमाणौ एवञ्च मनः चरणकमले लीनः भवतु, एवं प्रकारेण तौ भक्तौ भगवतः पूजां कृतवन्तौ। अर्चनं तु शुद्धिन्यासादिपूर्वाङ्गकर्म-निर्वाहपूर्वकम् उपचाराणां मन्त्रेण उपपादनं स्यात्। तत्त्वदर्शिभिः एतत् निरूपितं यत् भगवतः पूजनं चित्तशान्तये प्रमुखं साधनं, मोक्षप्राप्तये सुलभः उपायः एवञ्च आह्लादकारः धर्मः अस्ति।

**6.वन्दनम्**

दण्डवत्प्रणामादि सर्वाङ्गैरभिवादनं वन्दनमुच्यते, यः पुरुषः स्वरूपस्य फलस्य भोगं कृत्वा भगवतः कृपायाः प्रत्यक्षां कृत्वा, हृदयवपुभिः भगवतः चरणकमले समर्पणं कृत्वा नमस्करोति स

मोक्षप्राप्तेः अधिकारी भवति। वन्दनभक्तेषु सर्वोत्तमः भवति अक्रूरः। स श्रीकृष्णस्य मातुलः आसीत्। कंसस्य आदेशेन स यदा श्रीकृष्णं नेतुं व्रजं प्रति गतः, तदा तस्य मनः अतीव प्रसन्न आसीत्। यथा उक्तं भागवते

**भामाद्यमङ्गलं नष्टं फलवांश्चैव मे भव।**
**यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम्।।**

अद्यमम अमङ्गलं नष्टं जातं, मम जन्म सफलं जातम्। कथमित्युक्ते योगीनां ध्यानयोग्यस्य परमपुरुषस्य श्रीकृष्णस् पदारविन्दे नमस्कारः करिष्यामि यत् मम इच्छा आसीत् तत्पूर्णं भविष्यति इति।

**7.दास्यम् -**

"दास्यं कर्मार्पणं तस्य कैङ्कर्यमपि सर्वथा" इति। अर्थात् स्वकर्मार्पणं साधारणतया दास्यमित्युच्यते। पुनरपि दास्यभक्तिः सर्वश्रेष्ठा इति ब्रह्मवैवर्तपुराणे प्रतिपादितमस्ति।

सर्वेषु वरेषु श्रेष्ठतमं वरं भवति हरिभक्तिं हरिदास्यं वा। ये पञ्चप्रकारकाः श्रेष्ठाः मुक्तयः सन्ति तेषु हरिभक्तिः गुरुतरमिति मन्यते। ब्रह्मत्वं, दवत्वं, अमरत्वं, अमुतत्वप्राप्तिः, सिद्धिलाभश्च एतेषु सर्वेषु हरिदासत्वं प्राप्तिः सुदुर्लभा।

स्वाभाविकं भद्रं कर्म, जपध्यानार्चनादि च इति इदं द्विविधं दास्यं वैष्णवैः कृष्णे अर्पितम्। दास्यभक्तेषु सर्वश्रेष्ठः भक्तः अस्ति पवनपुत्रः हनुमान्। सः जन्मादेव एकमेव मन्त्रं जानाति स्म "राम" इति। भगवतः रामस्य सेवायां स सदासर्वदा तत्परः आसीत्। स चित्तेन कर्मणा च भगवन्तमर्पितः आसीत् सर्वे तामेव समर्पितवान् सः।

**8. सख्यम्**

"विश्वासो मित्रवृत्तिश्च सख्यं द्विविधमीरितम्" इति। अर्थात् सख्यं द्विविधम् ईरितं विश्वासः मित्रवृत्तिश्च। भगवति सखा मित्रं च भावः यस्य अस्ति सः भवति सख्यासक्तः भक्तः। पुनरपि ते भक्ताः मित्रवदाचरित्वापि भक्तिभावः स्थापयन्ति। अर्जुनः सख्यासक्तेषु भक्तेषु सर्वोत्तमः। स भगवन्तं श्रीकृष्णं मित्रममत्वापि श्रीकृष्णं भक्तिं कुर्वन्नासीत्। कुरुक्षेत्रे युद्धे भगवान् श्रीकृष्णः स्वयम् अर्जुनस्य सारथीः आसीत्। पुनरेकः भक्तः भवति श्रीदामः। एकदा सः द्वारकां प्रत्यागतः। यदा श्रीकृष्णः ज्ञातवान् तस्य बालस्य सखा आगच्छति तदा स भोजनं पादत्राणां च परित्यज्य श्रीदां नेतुं धावितवान्। तामानीय स्वसिंहासने संस्थाप्य तस् पद्धौतं कृत्वा पूजां कृतवान्। भगवान् भवति भक्तवत्सलः। यथा भक्तः भगवन्तमाराधयति तथैव भगवानपि भक्तस्य समादरं करोति।

**9. आत्मनिवेदनम्**

यः मनुष्यः सर्वान् कामान् परित्यज्य भगवति सर्वं समर्पयति तदा भगवतः कृपया मोक्षं प्राप्नोति। एवं च भगवति लीनं भवति।

आत्मनिवेदनयुक्त भक्त आसीत् राजा बलिः। बलेः जातः राक्षसकुले आसीत्। परन्तु सः भगवतः विष्णोः भक्तः प्रह्लादस्य वंशे जातः इति हेतोः स करुणशीलः, दानशीलः, इन्द्रियसयममी, सर्वभूतहीतेरतः आसीत्। स दानवीर आसीत्। भगवान् विष्णुः स्वयं तस्य पार्श्वे दानं याचनाय आगतवान्। कारणं तस्य गर्वभग्नं कर्तुम्। स सर्वगुणसम्पन्न भूत्वापि गर्वि आसीत्। तस्य दर्प सः छलेन त्रिपादं भूमिं याचयामास। एवं तस्मात् त्रिभुवनम् स्वीकृतवान्।

स्वहम् इति सत्यं सर्वस्वं तामेव समर्पणं करणीयम्। स एव सत्यम् अन्यत्सर्वम् असत्यम् इति स एव आश्रयणीयानाम् आश्रयः इति।

एवम् प्रकारेण "श्रीमद्भागवेत नवधाभक्तिः" इति विषयं यथाशक्तिः प्रतिपाद्य विरमामि।